## ॥ तृतीयोऽध्यायः ॥

ध्यानं
ॐ उद्यद्भानु सहस्रकान्तिं अरुण क्षौमां शिरोमालिकां
रक्तालिप्त पयोधरां जपवटीं विद्या मभीतिं वरं ।
हस्ताब्जै र्धधतीं त्रिनेत्र विलस द्वक्त्रारविन्द श्रियं
देवीं बद्ध हिमांशु रत्न मुकुटां वन्दे ऽरविन्द स्थिताम् ॥

ॐ ऋषिरुवाच ॥ १॥
निहन्यमानं तत्सैन्यं अवलोक्य महासुरः ।
सेनानीश्चिक्षुरः कोपात् ययौ योद्धु मथाम्बिकाम् ॥ २॥

स देवीं शरवर्षेण ववर्ष समरेऽसुरः ।
यथा मेरुगिरेः शृङ्गं तोय वर्षेण तोयदः ॥ ३॥

तस्यच्छित्वा ततो देवी लीलयैव शरोत्करान् ।
जघान तुरगान्बाणैर् यन्तारं चैव वाजिनाम् ॥ ४॥

चिच्छेद च धनुः सद्यो ध्वजं चाति समुच्छ्रितम् ।
विव्याध चैव गात्रेषु छिन्न धन्वान माशुगैः ॥ ५॥

सच्छिन्न धन्वा विरथो हताश्वो हत सारथिः ।
अभ्य धावत तां देवीं खड्ग चर्म धरोऽसुरः ॥ ६॥

सिंह माहत्य खड्गेन तीक्ष्ण धारेण मूर्धनि ।

आजघान भुजे सव्ये देवीमप्यति वेगवान् ॥ ७॥

तस्याः खड्गो भुजं प्राप्य पफाल नृप नन्दन ।
ततो जग्राह शूलं स कोपादरुण लोचनः ॥ ८॥

चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः ।
जाज्वल्यमानं तेजोभी रविबिम्ब मिवाम्बरात् ॥ ९॥

दृष्ट्वा तदापतच्छूलं देवी शूल ममुञ्चत ।
तच्छूलं शतधा तेन नीतं स च महासुरः ॥ १०॥

हते तस्मिन्महावीर्ये महिषस्य चमूपतौ ।
आजगाम गजारूढश् चामर स्त्रिदशार्दनः ॥ ११॥

सोऽपि शक्तिं मुमोचाथ देव्यास्ता मम्बिका द्रुतम् ।
हुङ्काराभि हतां भूमौ पातयामास निष्प्रभाम् ॥ १२॥

भग्नां शक्तिं निपतितां दृष्ट्वा क्रोध समन्वितः ।
चिक्षेप चामरः शूलं बाणैस्तदपि साच्छिनत् ॥ १३॥

ततः सिंहः समुत्पत्य गज कुम्भान्तरे स्थितः ।
बाहु युद्धेन युयुधे तेनोच्चै स्त्रिदशारिणा ॥ १४॥

युध्यमानौ ततस्तौ तु तस्मान्नागान्महीं गतौ ।
युयुधातेऽति संरब्धौ प्रहारै रतिदारुणैः ॥ १५॥

ततो वेगात् खमुत्पत्य निपत्य च मृगारिणा ।
कर प्रहारेण शिरश् चामरस्य पृथक् कृतम् ॥ १६॥

उदग्रश्च रणे देव्या शिला वृक्षादिभि र्हतः ।
दन्त मुष्टि तलैश्चैव करालश्च निपातितः ॥ १७॥

देवी क्रुद्धा गदापातैश् चूर्णयामास चोद्धतम् ।
बाष्कलं भिन्दि पालेन बाणैस्ताम्रं तथान्धकम् ॥ १८॥

उग्रास्य मुग्रवीर्यं च तथैव च महाहनुम् ।
त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी ॥ १९॥

बिडाल स्यासिना कायात् पातयामास वै शिरः ।
दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयम् ॥ २०॥

एवं सङ्क्षीयमाणे तु स्वसैन्ये महिषासुरः ।
माहिषेण स्वरूपेण त्रासयामास तान् गणान् ॥ २१॥

कांश्चित्तुण्ड प्रहारेण खुरक्षेपै स्तथापरान् ।
लाङ्गूल ताडितांश्चान्यान् शृङ्गाभ्यां च विदारितान् ॥ २२॥

वेगेन कांश्चिदपरान् नादेन भ्रमणेन च ।
निःश्वास पवने नान्यान् पातयामास भूतले ॥ २३॥

निपात्य प्रमथानीकं अभ्य धावत सोऽसुरः ।
सिंहं हन्तुं महादेव्याः कोपं चक्रे ततोऽम्बिका ॥ २४॥

सोऽपि कोपान्महावीर्यः खुरक्षुण्ण महीतलः ।
शृङ्गाभ्यां पर्वतानुच्चांश् चिक्षेप च ननाद च ॥ २५॥

वेगभ्रमण विक्षुण्णा मही तस्य व्यशीर्यत ।
लाङ्गूले नाहतश्चाब्धिः प्लावयामास सर्वतः ॥ २६॥

धुतशृङ्ग विभिन्नाश्च खण्डं खण्डं ययुर्घनाः ।
श्वासानिलास्ताः शतशो निपेतु र्नभसोऽचलाः ॥ २७॥

इति क्रोध समाध्मातं आपतन्तं महासुरम् ।
दृष्ट्वा सा चण्डिका कोपं तद्वधाय तदाकरोत् ॥ २८॥

सा क्षिप्त्वा तस्य वै पाशं तं बबन्ध महासुरम् ।
तत्याज माहिषं रूपं सोऽपि बद्धो महामृधे ॥ २९॥

ततः सिंहोऽभवत्सद्यो यावत्तस्याम्बिका शिरः ।
छिनत्ति तावत् पुरुषः खड्ग पाणि रदृश्यत ॥ ३०॥

तत एवाशु पुरुषं देवी चिच्छेद सायकैः ।
तं खड्ग चर्मणा सार्धं ततः सोऽभून्महागजः ॥ ३१॥

करेण च महासिंहं तं चकर्ष जगर्ज च ।
कर्षतस्तु करं देवी खड्गेन निरकृन्तत ॥ ३२॥

ततो महासुरो भूयो माहिषं वपुरास्थितः ।

तथैव क्षोभयामास त्रैलोक्यं सचराचरम् ॥ ३३॥

ततः क्रुद्धा जगन्माता चण्डिका पान मुत्तमम् ।
पपौ पुनः पुनश्चैव जहासारुण लोचना ॥ ३४॥

ननर्द चासुरः सोऽपि बलवीर्य मदोद्धतः ।
विषाणाभ्यां च चिक्षेप चण्डिकां प्रति भूधरान् ॥ ३५॥

सा च तान्प्रहितां स्तेन चूर्णयन्ती शरोत्करैः ।
उवाच तं मदोद्धूत मुखरागा कुलाक्षरम् ॥ ३६॥

देव्युवाच ॥ ३७॥
गर्ज गर्ज क्षणं मूढ मधु यावत्पिबाम्यहम् ।
मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशु देवताः ॥ ३८॥

ऋषिरुवाच ॥ ३९॥
एवमुक्त्वा समुत्पत्य सारूढा तं महासुरम् ।
पादेनाक्रम्य कण्ठे च शूलेनैन मताडयत् ॥ ४०॥

ततः सोऽपि पदाक्रान्त स्तया निज मुखात् ततः ।
अर्ध निष्क्रान्त एवासीत् देव्या वीर्येण संवृतः ॥ ४१॥

अर्ध निष्क्रान्त एवासौ युध्यमानो महासुरः ।
तया महासिना देव्या शिरश्छित्त्वा निपातितः ॥ ४२॥

ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत् ।

STOTRADHWANI

प्रहर्षं च परं जग्मुः सकला देवतागणाः ॥ ४३॥

तुष्टुवुस्तां सुरा देवीं सहदिव्यै र्महर्षिभिः ।
जगु र्गन्धर्व पतयो ननृतुश्चाप्सरो गणाः ॥ ४४॥

॥ इति श्रीमार्कण्डेय पुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
महिषासुर वधो नाम तृतीयोऽध्यायः ॥ ३॥